6.1.3.

आज़ादी का अमृत महोत्सव

# सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,वाराणसी

## दीक्षान्तमहोत्सवस्याधिसूचना

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य **एकोनचत्वरिंशत्तमो दीक्षान्तमहोत्सवः** 03.01.2022 दिनाङ्के विश्वविद्यालयस्य मुख्यभवने सम्पत्स्यते।

अस्मिन्नवसरे2021-वर्षीयविद्यावारिध्याचार्यशास्त्रिशिक्षाशात्र्यायुर्वेदाचार्य-ग्रन्थालयविज्ञान-पत्रकारिताएवंजनसञ्चारविज्ञानस्नाकोत्तरपरीक्षासमुत्तीर्णेभ्यः स्नातकेभ्य उपाधयः प्रदास्यन्ते।

सम्बद्धाः स्नातका एतद्द्वारा सूच्यन्ते यद् 26.12.2021 दिनाङ्कं यावद् अधस्तनं स्वीकृतिपत्रं प्रपूर्य कुलसचिवस्य कार्यालये प्रेषयन्तु। 27.12.2021 एवं 28.12.2021 दिनाङ्कयोः 10 वादने स्वयमुपस्थाय अधोनिर्दिष्टानि प्रारूपाणि प्रपूरितानि प्रदर्श्य पञ्चाशदधिकशतद्वय – (250) रूप्यकाणि च प्रदाय परिधानवस्त्राण्युपाधीश्च लभेरन् ।

सूचना- अत्र संलग्नं पत्रत्रयं वर्तते। तत्र प्रथमं प्रमाणपत्रं, दीक्षान्तमहोत्सवे प्रवेशाय यद् विद्यालयीस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रस्नातकेभ्यस्तु शास्त्रिपरीक्षान्तं स्वीकृतस्य महाविद्यालयस्य प्रधानाचार्यः, अथवा शिक्षाविभागस्य निरीक्षकः, अथवा हाईस्कूलकक्षान्तं स्वीकृतस्य विद्यालयस्य प्रधानाध्यापको यद् उत्तीर्णपरीक्षाया आवेदनपत्रं प्रेषितम् आसीत् , दास्यति। द्वितीयं पत्रं छात्रः 27.12.2021 दिनाङ्कात् पूर्वं कुलसचिवकार्यालये पूरयित्वा प्रापयिष्यति। तृतीयं पत्रं विद्यालयीयस्नातकेभ्यः प्रधानाचार्यः, स्वतन्त्रच्छात्रेभ्यश्च निर्धारितोऽधिकारी दास्यति।

विशेषः- स्नातकैः द्वितीयं स्वीकृतिपत्रं तृतीयश्च कुलसचिवस्य कार्यालये 27.12.2021 दिनाङ्कात् पूर्वं प्रेषणीयम्, प्रथमञ्च सहैवानेयम् । तत् प्रदर्श्य उत्सवप्रवेशपत्रं स्नातकीयपरिधानञ्च ग्रहीतव्यम् ।

**कुलसचिवः**

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य,वाराणसी

Scanned by CamScanner